# .. uddhava kritaM shrIrAdhAstotram ..

# ॥ उद्धव कृतं श्रीराधास्तोत्रम् ॥

॥ अथ उद्धवकृतं श्रीराधास्तोत्रम्॥
उद्धव उवाच ।
वन्दे राधापदाम्भोजं ब्रह्मादिसुरवन्दितम् ।
यत्कीर्तिकीर्तनेनैव पुनाति भुवनत्रयम् ॥ १॥
नमो गोकुलवासिन्यै राधिकायै नमो नमः ।
शतशृङ्गनिवासिन्यै चन्द्रावत्यै नमो नमः ॥ २॥
तुलसीवनवासिन्यै वृन्दारण्यै नमो नमः ।
रासमण्डलवासिन्यै रासेश्वर्यै नमो नमः ॥ ३॥
विरजातीरवासिन्यै वृन्दायै च नमो नमः ।
वृन्दावनविलासिन्यै कृष्णायै नमो नमः ॥ ४॥
नमः कृष्णप्रियायै च शान्तायै च नमो नमः ।
कृष्णवक्षःस्थितायै च तत्प्रियायै नमो नमः ॥ ५॥
नमो वैकुण्ठवासिन्यै महालक्ष्म्यै नमो नमः ।
विद्याधिष्ठातृदेव्यै च सरस्वत्यै नमो नमः ॥ ६॥
सर्वैश्वर्याधिदेव्यै च कमलायै नमो नमः ।
पद्मनाभप्रियायै च पद्मायै च नमो नमः ॥ ७॥
महाविष्णोश्च मात्रे च पराद्यायै नमो नमः ।
नमः सिन्धुसुतायै च मर्त्यलक्ष्म्यै नमो नमः ॥ ८॥
नारायणप्रियायै च नारायण्यै नमो नमः ।
नमोऽस्तु विष्णुमायायै वैष्णव्यै च नमो नमः ॥ ९॥
महामायास्वरूपायै सम्पदायै नमो नमः ।
नमः कल्याणरूपिण्यै शुभायै च नमो नमः ॥ १०॥
मात्रे चतुर्णां वेदानां सावित्र्यै च नमो नमः ।
नमो दुर्गविनाशिन्यै दुर्गादेव्यै नमो नमः ॥ ११॥
तेजःसु सर्वदेवानां पुरा कृत्युगे मुदा ।
अधिष्ठानकृतायै च प्रकृत्यै च नमो नमः ॥ १२॥
नमस्त्रिपुरहारिण्यै त्रिपुरायै नमो नमः ।
सुन्दरीषु च रम्यायै निर्गुणायै नमो नमः ॥ १३॥
नमो निद्रास्वरूपायै निर्गुणायै नमो नमः ।
नमो दक्षसुतायै च सत्यै नमो नमः ॥ १४॥
नमः शैलसुतायै च पार्वत्यै च नमो नमः ।
नमो नमस्तपस्विन्यै ह्युमायै च नमो नमः ॥ १५॥

निराहारस्वरूपायै ह्यपर्णायै नमो नमः ।
गौरीलोकविलासिन्यै नमो गौर्यै नमो नमः ॥ १६ ॥
नमः कैलासवासिन्यै माहेश्वर्यै नमो नमः ।
निद्रायै च दयायै च श्रधायै च नमो नमः ॥ १७ ॥
नमो धृत्यै क्षमायै च लज्जायै च नमो नमः ।
तृष्णायै क्षुत्स्वरूपायै स्थितिकर्त्र्यै नमो नमः ॥ १८ ।
नमः संहाररूपिण्यै महामायै नमो नमः ।
भयायै चाभयायै च मुक्तिदायै नमो नमः ॥ १९ ॥
नमः स्वधायै स्वाहायै शान्त्यै कान्त्यै नमो नमः ।
नमस्तुष्ट्यै च पुष्ट्यै च दयायै च नमो नमः ॥ २० ॥
नमो निद्रास्वरूपायै श्रद्धायै च नमो नमः ।
क्षुत्पिपासास्वरूपायै लज्जायै च नमो नमः ॥ २१ ॥
नमो धृत्यै क्षमायै च चेतनायै च नमो नमः ।
सर्वशक्तिस्वरूपिण्यै सर्वमात्रे नमो नमः ॥ २२ ॥
अग्नौ दाहस्वरूपायै भद्रायै च नमो नमः ।
शोभायै पूर्णचन्द्रे च शरत्पद्मे नमो नमः ॥ २३ ॥
नास्ति भेदो यथा देवि दुग्धधावल्ययोः सदा ।
यथैव गन्धभूम्योश्च यथैव जलशैत्ययोः ॥ २४ ॥
यथैव शब्दनभसोर्ज्योतिरःसूर्यकयोर्तथा ।
लोके वेदे पुराणे च राधामाधावयोस्तथा ॥ २५ ॥
चेतनं कुरु कल्याणि देहि मामुत्तरं सति ।
इत्युक्त्वा चोद्धवस्तत्र प्रणनाम पुनः पुनः ॥ २६ ॥
इत्युद्धवकृतं स्तोत्रं यः पठेद् भक्ति पूर्वकम् ।
इह लोके सुखं भुक्त्वा यात्यन्ते हरिमन्दिरम् ॥ २७ ॥
न भवेद् बन्धुविच्छेदो रोगः शोकः सुदारुणः ।
प्रोषिता स्त्री लभेत् कान्तं भार्याभेदी लभेत् प्रियाम् ॥ २८ ॥
अपुत्रो लभते पुत्रान् निर्धनो लभते धनम् ।
निर्भुमिर्लभते भूमिं प्रजाहिनो लभेत् प्रजाम् ॥ २९ ॥
रोगाद् विमुच्यते रोगी बद्धो मुच्येत् बन्धनात् ।
भयान्मुच्येत् भीतस्तु मुच्येतापन्न आपदः ॥ ३० ॥
अस्पष्टकीर्तिः सुयशा मूर्खो भवति पण्डितः ॥ ३१ ॥
इति श्रीब्रह्मवैवर्ते उद्धवकृतं श्रीराधास्तोत्रं सम्पूर्णम् ॥

Encoded by Daniel Mohanpersad danielmohanpersad98@msn.com

Please send corrections to sanskrit@cheerful.com
Last updated July 2, 2011